# Snehalatikaya Kritam Purushottama Stotram

# સ્નેહલતિકયા કૃતં પુરુષોત્તમસ્તોત્રમ્ ૧૧

## Document Information

Text title : Snehalatikaya Kritam Purushottama Stotram

File name : snehalatikayAkRRitaMpuruShottamastotram11.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 192/27-43||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# સ્નેહલતિકયા કૃતં પુરુષોત્તમસ્તોત્રમ્ ૧૧

(ધનિષ્ઠકોશશ્રેષ્ઠિનઃ ભાર્યયા સ્નેહલતિકયા કૃતં પુરુષોત્તમસ્તોત્રમ્૦)
અથાઽસ્ય પુત્રાઃ પુત્ર્યશ્ચ પત્ની સાધ્વી સધર્મિણી ॥ ૨૭॥

નામ્ના સ્નેહલતાદેવી શુશોચ સ્વપતિસ્થિતિમ્ ।
મહાભાગવતી પત્ની ભજતે શ્રીહરિં તુ મામ્ ॥ ૨૮॥

પ્રાર્થયત્યેવ પૂજાયાં પત્યુર્ધર્મસ્ય રક્ષણમ્ ।
અધર્મસ્ય પરિત્યાગં યશઃ કીર્તિં સુવંશજામ્ ॥ ૨૯॥

બાલકૃષ્ણ હરે કૃષ્ણ પુરુષોત્તમ માધવ ।
તવ ભક્તસ્ય ચિત્તે યચ્ચાઽઽચલ્યં તત્પ્રશામય ॥ ૩૦॥

અનાદિશ્રીકૃષ્ણ નારાયણ શ્રીકાન્ત કેશવ ।
મમ પત્યુર્વ્યવાયસ્ય વ્યસનં ત્વં પ્રમોચય ॥ ૩૧॥

રાજાઽપિ તવ ભક્તઃ સ્યાત્તથા કૃષ્ણ વિધેહિ ચ ।
ગણિકા અપિ ભક્તાઃ સ્યુર્યથા તે પરમાત્મનઃ ॥ ૩૨॥

પ્રજાશ્ચાપિ ચ ભક્તાઃ સ્યુસ્તથા કૃષ્ણ કૃપાં કુરુ ।
વ્રતં ચાદ્યદિનાત્તેઽહં વર્ષાન્તં ત્વેકભોજનમ્ ॥ ૩૩॥

કરિષ્યે ચ તથા સાધુસતીસેવા સમાહિતા ।
પ્રત્યહં પૂજનં તે ચ કરિષ્યે ઘટિકાવધિમ્ ॥ ૩૪॥

ષોડશૈરુપચારૈશ્ચ કારયિષ્યે તુ સૂતકે ।
પ્રેઙ્ખાં સ્વર્ણમયીં ચાપિ મૂર્તિં સ્વર્ણમયીં ચ તે ॥ ૩૫॥

કારયિષ્યે શ્રિયા યુક્તાં રાધયા રમયા યુતામ્ ।
પદ્માવત્યા યુતાં યુક્તાં માણિક્યયા ચ શોભનામ્ ॥ ૩૬॥

લક્ષ્મ્યા યુક્તાં તથા રમ્યાં વિભૂષાઢ્યાં સુયૌવનામ્ ।
શય્યાપર્યઙ્કમેવાપિ કારયિષ્યે શુભોત્તમામ્ ॥ ૩૭॥

સ્વર્ણરાજતજન્યં ચ તવોપકરણાન્યપિ ।
વ્યજને ચામરે છત્રં પાદુકે ભૂષણાનિ ચ ॥ ૩૮॥

કારયિષ્યે સ્વર્ણરત્નમયાનિ તવ તુષ્ટયે ।
નિત્યં સુગન્ધસારૈશ્ચ તૈલસારૈશ્ચ મર્દનમ્ ॥ ૩૯॥

અભ્યઞ્જનં દ્રવૈશ્ચાપિ પૂજનં તુલસીદલૈઃ ।
નૈવેદ્યં ઘૃતમિષ્ટાનૈઃ કારયિષ્યેઽતિતુષ્ટયે ॥ ૪૦॥

તવોત્સવાન્ કારયિષ્યે વાર્ષિકાન્ કાન્ત કેશવ ।
વણિજં મે પતિં વારાઙ્ગનાવ્યસનાન્મોચય ॥ ૪૧॥

એષા તે શરણં પ્રાપ્તા પતિતા તવ પાદયોઃ ।
મમ પત્યુસ્તુ પાપાનિ પ્રજ્વાલય પ્રિયં કુરુ ॥ ૪૨॥

ઇત્યુક્ત્વા સ્નેહલતિકા દીપોત્સવીદિને હરેઃ ।
કૃત્વા મે પૂજનં ચાપ્યાસંવત્સરં વ્રતં વ્યધાત્ ॥ ૪૩॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૯૨-અધ્યાયાન્તર્ગતં ધનિષ્ઠકોશશ્રેષ્ઠિનઃ ભાર્યયા
સ્નેહલતિકયા કૃતં પુરુષોત્તમસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૯૨/૨૭-૪૩॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 192/27-43..

Proofread by PSA Easwaran

*Snehalatikaya Kritam Purushottama Stotram*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*